# Shivapujavidhanam

# શિવપૂજાવિધાનમ્

## Document Information

Text title : Shivapujavidhanam

File name : shivapUjAvidhAnam.itx

Category : shiva, pUjA, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshvarAkhyaH dashamAMshaH | adhyAyaH 44 | 1-51||

Latest update : September 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 10, 2024

*sanskritdocuments.org*

# શિવપૂજાવિધાનમ્

(શિવરહસ્યાન્તર્ગતે ઈશ્વરાખ્યે)

સ્કન્દ ઉવાચ ।
અથ તે સમ્પ્રવક્ષ્યામિ શિવપૂજાવિધિક્રમમ્ ।
નિગમાગમ ભેદેન પૂજા પ્રોક્તા મનીષિભિઃ ॥ ૧॥

પૂજનં શઙ્કરસ્યૈવ બહુધા પરિકીર્તિતમ્ ।
શ્રુતિસ્મૃતિ સમા(દા) ચારતન્ત્રાગમવિભેદતઃ ॥ ૨॥

બૃહજ્જાબાલકાઃ પ્રોચુઃ કેવલં લિઙ્ગપૂજનમ્ ।
પઞ્ચાયતનપૂજા હિ સ્મૃતિપ્રોક્તા મુનીશ્વર ॥ ૩॥

તન્ત્રાગમોક્તપૂજા હિ શિવદીક્ષાવતાં શિવે ।
નિગમાગમસંયુક્તા પૂજેયં કથ્યતે તવ ॥ ૪॥

શિવપ્રધાનપૂજેયં શિવલિઙ્ગૈકપૂજનમ્ ।
કેવલં તે સમાસેન સપઞ્ચાક્ષરસંયુતમ્ ॥ ૫॥

પ્રવક્ષ્યામિ યથા દેવ્યૈ પ્રોક્તં વિશ્વેશ્વરેણ હિ ।
કૈલાસશિખરાસીનં દેવં કામેશ્વરં વિભુમ્ ॥ ૬॥

બ્રહ્મોપેન્દ્રમહેન્દ્રાદ્યૈર્ગણૈર્વિદ્યાધરૈસ્તથા ।
દાનવૈર્મુનિભિઃ સિદ્ધૈર્યક્ષરક્ષોગણાધિપૈઃ ॥ ૭॥

હેરમ્બસ્કન્દપૂર્વાદિગણૈર્ભક્ત્યા સુસેવિતમ્ ।
અક્ષક્રીડારસાસ્વાદલાલસં પરમેશ્વરમ્ ॥ ૮॥

પ્રણમ્ય નન્દી પ્રોવાચ ક્રીડન્તં પરમેશ્વરમ્ ।
ક્રીડતો ભુવનેશસ્ય જગદમ્બિકયા સહ ॥ ૯॥

અક્ષપાતાધિકારે તુ પક્ષપાતધિયોજ્ઝિતઃ ।
ક્રીડતઃ ક્રમયોગેન જિતં દેવેન શમ્ભુના ॥ ૧૦॥

અક્ષપ્રપાતાદ્દેવેન પ્રોક્તં નન્દિન્ જિતં મયા ।
તદા સત્યાભિયોગેન તુષ્ટોઽહં ત્વયિ ભક્તિતઃ ॥ ૧૧॥

વરો મે પ્રિયતાં વત્સ યસ્તે મનસિ વર્તતે ।
દદામિ તં ન સન્દેહઃ પ્રીતેન મનસા તવ ॥ ૧૨॥

નન્દીશ્વરઃ ઉવાચ ।
તુષ્ટોઽસિ યદિ દેવેશ જગતામીશ્વર પ્રભો ।
વદ પૂજાવિધાનં તે (તાન્) શૈવાન્ મન્ત્રાન્ સુદુર્લભાન્ ॥ ૧૩॥

ચક્રાઙ્ગન્યાસસહિતાન્ પૂજાકર્મસમન્વિતાન્ ।
શિવ ઉવાચ ।
કથયામિ મહાભાગ ત્રૈલોક્યેષ્વપિ દુર્લભાન્ ॥ ૧૪॥

શૈવાન્ સર્વમનુશ્રેષ્ઠાન્ સર્વમન્ત્રેષુ ગોપિતાન્ ।
ભક્તોઽસીતિ ન મે કિઞ્ચિદવાચ્યં ત્વયિ સુવ્રત ॥ ૧૫॥

મૂલમન્ત્રાઙ્ગવિન્યાસ પૂજાકર્મસમન્વિતાન્ ।
દીક્ષાભિષેકસહિતાનધિકારસમન્વિતાન્ ॥ ૧૬॥

ઉદ્ધારક્રમયોગેન સર્વકામફલપ્રદાન્ ।
સુસમે ભૂપ્રદેશે તુ ગોમયેનોપલેપિતે ॥ ૧૭॥

પુષ્પપ્રકરશોભાઢ્યે ગન્ધધૂપતરઙ્ગિતે ।
વિલિખેન્માતૃકાસ્તત્ર વર્ગાષ્ટકવિભેદતઃ ॥ ૧૮॥

સ્વરૈઃ ષોડશભિર્વર્ણૈઃ પ્રથમઃ પરિકીર્તિતઃ ।
પઞ્ચપઞ્ચાક્ષરાંશ્ચાન્યૌ દ્વાવન્યૌ ચતુરક્ષરૌ ॥ ૧૯॥

વર્ગાષ્ટકં ભવેદેવં તતો મન્ત્રાન્ સમુદ્ધરેત્ ।
પઞ્ચમસ્યતુ વર્ગસ્ય પઞ્ચમં પ્રથમં ભવેત્ ॥ ૨૦॥

ષષ્ઠવર્ગાન્તિમોવર્ણઃ પ્રથમાન્ત્યસમાન્વિતઃ ।
દ્વિતીયં વર્ણમાખ્યાતમષ્ટમસ્યાદ્યમક્ષરમ્ ॥ ૨૧॥

પ્રથમસ્ય તૃતીયાર્ણસમેતં તત્તૃતીયકમ્ ।
ચતુર્થં સપ્તમસ્યાન્ત્યં દ્વિતીયાદ્યસમન્વિતમ્ ॥ ૨૨॥

ચતુર્થવર્ણં મન્ત્રસ્ય સપ્તમાદ્યં તુ પઞ્ચમમ્ ।
એવ પઞ્ચાક્ષરો મન્ત્રઃ પ્રણવાદ્યઃ ષડક્ષરઃ ॥ ૨૩॥

યત્સાધનાત્તુ મનુજાઃ શિવસાયુજ્યમાપ્નુયુઃ ।
પ્રણવસ્તુ પરબ્રહ્મબોધકઃ સમુદીરિતઃ ॥ ૨૪॥

પઞ્ચાક્ષરમયાનિ સ્યુઃ પઞ્ચભૂતાનિ સુવ્રત ।
ભૂતાત્મકં જગદિદં તેનાસ્ય જગદાત્મતા ॥ ૨૫॥

ઋષિરુક્તો વામદેવઃ પઙ્ક્તિશ્છન્દ ઉદાહૃતમ્ ।
સદાશિવો દેવતાસ્ય મન્ત્રસ્ય પરિકીર્તિતા ॥ ૨૬॥

ષડઙ્ગાનિ મનોર્વર્ણૈર્જાતિયુક્તાનિ કલ્પયેત્ ।
તત્પુરુષાઘોરસદ્યોવામદેવેશસંજ્ઞિતાઃ ॥ ૨૭॥

મૂલવર્ણાદિકાન્ન્યસ્ય ત્રિષુ સ્થાનેષ્વતન્દ્રિતઃ ।
તર્જનીમધ્યમાન્ત્યાનામાઙ્ગુષ્ઠેન તથા પરઃ ॥ ૨૮॥

આસ્યહૃત્પાદગુહ્યાદિમૂર્ધ્નિ હસ્તેષુ ચાપરઃ ।
(આસ્યહૃત્પાદગુહ્યાદૌ મૂર્ધ્નિ હસ્તેષુ ચાપરઃ ।)
પ્રાગ્યામ્યવારુણોદીચ્યમધ્યવક્ત્રેષુ પઞ્ચસુ ॥ ૨૯॥

તતઃ ષડઙ્ગં વિન્યસ્યેદ્વક્ષ્યમાણં યથાવિધિ ।
સર્વજ્ઞો નિત્યતૃપ્તશ્ચ બોધાન્તોઽનાદિરેવ ચ ॥ ૩૦॥

સ્વતન્ત્રશક્તિશ્ચાલુપ્ત શક્તિશ્ચાનન્તશક્તિયુક્ ।
મૂલમન્ત્રેણ પૂર્વૈશ્ચ ધામ્ને શબ્દાન્તગૈઃ ક્રમાત્ ॥ ૩૧॥

ષડઙ્ગાનિ મનોરસ્ય જાતિયુક્તાનિ મન્ત્રવિત્ ।
કુર્વીત ગોલકન્યાસં રક્ષાર્યૈ નન્દિકેશ્વર ॥ ૩૨॥

હૃદિ વક્ત્રાંસયોરૂર્વોઃ કચે નાભૌ દ્વિપાર્શ્વયોઃ ।
પૃષ્ઠે હૃદિ તતો મૂર્ધ્નિ વદને નેત્રયોર્નસોઃ ॥ ૩૩॥

દોઃસન્ધિષુ નખાગ્રેષુ વિન્યસેત્તદનન્તરમ્ ।
શિરોવદનહૃત્કુક્ષૌ ઊર્વોઃ પાદદ્વયે પુનઃ ॥ ૩૪॥

હૃદિ વક્ત્રામ્બુજે કણ્ઠે મૃગાભયકરેષ્વથ ।
વક્ત્રાંસહૃત્સુ પાદોરુ જઠરેષુ ન્યસેદથ ॥ ૩૫॥

મૂલમન્ત્રસ્ય ષડ્વર્ણાન્ યથાવદ્દેશિકોત્તમઃ ।
મૂર્ધ્નિ પાદોદરાઙ્ગેષુ હૃદયે તાં પુનર્ન્યસેત્ ॥ ૩૬॥

પશ્ચાદનેન મન્ત્રેણ કુર્યાત્સ્વં વ્યાપકં સુધીઃ ।

ગોક્ષીરફેનધવલં રજતાદ્રિસમપ્રભમ્ ॥ ૩૭॥

ચારુચન્દ્રકલારાજજ્જટામકુટમણ્ડિતમ્ ।
પઞ્ચવક્ત્રધરં શમ્ભું શિતિકણ્ઠં ત્રિલોચનમ્ ॥ ૩૮॥

શાર્દૂલચર્મવસનં નાનાભરણભૂષિતમ્ ।
દક્ષોર્ધ્વહસ્તે પરશું તદધસ્તાદ્વરં કરે ॥ ૩૯॥

વામોર્ધ્વહસ્તે હરિતં દધાનમભયં કરે ।
સુપ્રસન્નમુખામ્ભોજં નિવિષ્ટં પદ્મવિષ્ટરે ॥ ૪૦॥

વિષ્ણુબ્રહ્મમહેન્દ્રાદ્યૈઃ સ્તુતં ભક્ત્યા શિવાયુતમ્ ।
વિશ્વાદ્યં વિશ્વપુષં ભાવયેત્ હૃદિ શઙ્કરમ્ ॥ ૪૧॥

ઇતિ ધ્યાત્વા ગણશ્રેષ્ઠં માનસૈરર્ચયેચ્છિવમ્ ।
ઉપચારૈઃ ષોડશભિર્બાહ્યપીઠે સમર્ચયેત્ ॥ ૪૨॥

પદ્મં વસુદલં કૃત્વા કર્ણિકાકેસરોજ્જવલમ્ ।
બહિરષ્ટદલદ્વન્દ્વં ચતુરસ્ર સમન્વિતમ્ ॥ ૪૩॥

ચતુર્દ્વારસમાયુક્તે મણ્ડલેઽસ્મિન્ પ્રપૂજયેત્ ।
એવં પીઠં સમભ્યર્ચ્ય મૂર્તિં મૂલેન હૃદ્ગતામ્ ॥ ૪૪॥

આવાહ્ય લિઙ્ગે મૂલેન સપુષ્પેણ ગણોત્તમ ।
પાદ્યાર્ઘ્યાચમનૈર્નીરૈઃ સુપુષ્પૈર્વાસિતૈસ્તદા(થા) ॥ ૪૫॥

પઞ્ચગન્ધૈઃપઞ્ચફલૈર્ગવાં પઞ્ચામૃતૈરપિ ।
ગન્ધપુષ્પામ્બુરત્નૌઘૈરુત્તાનૈરુત્તરાગ્રકૈઃ ॥ ૪૬॥

અન્યપુષ્પૈર્યથાલાભં મન્ત્રૈરેતૈર્ગણોત્તમ ।
હરો મહેશ્વરઃ શમ્ભુરુગ્રો ભીમઃ શિવસ્તથા ॥ ૪૭॥

સંસારવૈદ્યઃ સર્વજ્ઞ ઇત્યાદ્યૈશ્ચ નમોઽન્તકૈઃ ।
ધૂપં દીપં ચ નૈવેદ્યં તામ્બૂલં ચ તતો ગણ ॥ ૪૮॥

દદ્યાન્મૂલેન દેવાય પ્રણામપ્રક્રમૈસ્તથા ।
નીરાજનં નર્તનં ચ પુનર્મન્ત્રજપસ્તથા ॥ ૪૯॥

આવાહિતસ્ય હૃદયે પુનરુદ્વાસનં તથા ।
સઙ્ગ્રહાદ્વિધિરેવાયં વિસ્તરે ચેદથોત્તરે ॥ ૫૦॥

એવં ભક્તગણોત્તમોઽત્ર હિ સદા લિઙ્ગં ત્રિકાલં યજન્
કાલં ચૈકમથ દ્વિતીયમગજે રુદ્રો ભવેન્મૈનકે ।
તેનાનુત્તમભોગસમ્પદખિલા પ્રાપ્યેત ભૂમણ્ડલે
લિઙ્ગારાધન સાધનૈકમનસા તુષ્ટો વિશિષ્ટો ભવેત્ ॥ ૫૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઈશ્વરપ્રોક્તં શિવપૂજાવિધાનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશ્વરાખ્યઃ દશમાંશઃ । અધ્યાયઃ ૪૪ શિવપૂજાવિધાનમ્ । ૧-૫૧॥

- .. shrIshivarahasyam . IshvarAkhyaH dashamAMshaH . adhyAyaH 44 shivapUjAvidhAnam . 1-51..

Notes:
Skanda સ્કન્દ narrates the description of ŚivaPūjāVidhāna શિવપૂજાવિધાન as told to Nandī નન્દી by Śiva શિવ upon being requested. Śiva શિવ talks about the ŚivaPañcākṣaraMantra શિવપઞ્ચાક્ષરમન્ત્ર i.e. Namaḥ Śivāya નમઃ શિવાય while also referring to the ŚivaṢaḍakṣaraMantra શિવષડક્ષરમન્ત્ર i.e. Oṁ Namaḥ Śivāya ઓં નમઃ શિવાય. He mentions about the nyāsa ન્યાસ and mapping of the Five Faces i.e. Pañcavaktra પઞ્ચવક્ત્ર with the Five Akṣara i.e. Pañcākṣara પઞ્ચાક્ષર of the ŚivaPañcākṣaraMantra શિવપઞ્ચાક્ષરમન્ત્ર Namaḥ Śivāya નમઃ શિવાય Viz.
Tatpuruṣa - Na-kāra તત્પુરુષ - ન-કાર,
Aghora - Ma-kāra અઘોર - દક્ષિણ - મ-કાર,
Sadyojāta - Śi-kāra સદ્યોજાત - શિ-કાર,
Vāmadeva - Va-kāra વામદેવ - વ-કાર,
Īśāna - Ya-kāra ઈશાન - ય-કાર.

Proofread by Ruma Dewan

*Shivapujavidhanam*
pdf was typeset on September 10, 2024

Please send corrections to *sanskrit@cheerful.com*